# Shankaraih Prokta Shiva Stuti

# શાङ્કરૈઃ પ્રોક્તા શિવસ્તુતિઃ

## Document Information

Text title : Shankaraih Prokta Shiva Stuti

File name : shAnkaraiHproktAshivastutiH.itx

Category : shiva, shivarahasya, stuti

Location : doc_shiva

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | bhImAkhyaH aShTamAMshaH | adhyAyaH 15 | 9-24||

Latest update : July 4, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

July 5, 2024

*sanskritdocuments.org*

# Shankaraih Prokta Shiva Stuti

# શાઙ્કરૈઃ પ્રોક્તા શિવસ્તુતિઃ

(શિવરહસ્યાન્તર્ગતે ભીમાખ્યે)

શાઙ્કરાઃ ઉચુઃ

હે ગૌરીરમણારુણાચલપતે તૂર્ણં મમાભ્યર્ણગં
મૃત્યું વારય તારયાશુ દુરિતાત્સમ્પૂર્ણદૃક્સઙ્ગતઃ ।
ઘોરાપારભવાર્ણવાજ્જનિજરારોગાનુતાપૈરપિ
શમ્ભો મે મરણક્ષણેઽપિ શરણં તે પઙ્કજાભં પદમ્ ॥ ૯॥

હે ગૌરીકુચચારુશૈલશિખરાપારાદરસ્વાન્તર
મારોદ્દામસુદર્પસર્પકુહારાપારવ્યથાસંહર ।
હે કાકોદરભૂષ ભૂતિદ મહીધૃગ્ધુર્યબાણાસન
મથ્યત્સાગરસમ્ભવોત્તમગર શ્રીનીલકણ્ઠ પ્રભો ॥ ૧૦॥

પાહીશાન દયાનિધાન ભગવન્કારુણ્યસિન્ધો સદા ॥ ૧૧॥

હે ચન્દ્રદ્યુતિકોટિરઞ્જિતજટા કોટીર જૂટીલસ-
દ્દેવ શ્રીતટિનીતટોત્તમ પટીભૂતેભચર્માંમ્બર ।
હે કાલપ્રભુવર્ય ઘોટકમહાવેદોરુહેષાસ્તુત
ત્રુટ્યદ્દિક્તટ સમ્ભ્રમોરુનટન પાટીરપઙ્કાઙ્કિત ॥ ૧૨॥

હે શૂલોદ્યતહસ્ત મસ્તકલસચ્ચન્દ્રોરુગઙ્ગાધર
સ્વામિન્ દેવકિરીટકોટિવિલસત્પાદામ્બુજાવાદ્ય મામ્ ।
મુસ્તાશસ્તસમસ્તભીતિદમહાકોલોરુદંષ્ટ્રાધર-
વિત્રસ્તાખિલલોકરક્ષકમહાશાસ્તઃ પિતઃ પાહિ મામ્ ॥ ૧૩॥

હે ગઙ્ગામ્બુતરઙ્ગસઙ્ગસુમહાદિત્યોત્તમાઙ્ગ પ્રભો
માં દુર્બોધમનર્ઘભૂતિવિલસત્સર્વાઙ્ગરાગાવતાત્ ।
દિવ્યોત્તુઙ્ગભુજઙ્ગસઙ્ગ સુમહાનન્દાઙ્ગલિઙ્ગાન્તરં
અગ્નીષોમપતઙ્ગનેત્ર કરુણાદૃક્સઙ્ગતઃ પાહિમામ્ ॥ ૧૪॥

હે ભાલાક્ષ મહેશ રક્ષ કરુણામૂર્તેઽધ્વરાધ્યક્ષ માં
વીક્ષાશિક્ષિતમન્મથાઙ્ગ સુમહાદક્ષોરુશિક્ષાકર ।
તત્પક્ષાન્તરદેવવૃન્દકદન ધ્વંસીકૃતાધોક્ષજ
પાહ્યક્ષેશવરાશ્રય ત્રિભુવનાધ્યક્ષ પ્રભો પાહિમામ્ ॥ ૧૫॥

ત્ર્યક્ષાપાતદયાઘનાન્તરદૃશા સંવીક્ષ્ય સર્વદા
હે શમ્ભોઽનુપમોરુસુન્દર જટાભ્રાજચ્છશાઙ્ક પ્રભો ।
પ્રાજ્યાજ્યાપ્લુતવહ્નિવક્ત્રહવનપ્રાચુર્યરાજ્યપ્રદ
ભૈષજ્યોત્તમ દેવ દેવ સુમહાપાપાન્વિતે મય્યતિ-
હૃત્તાપેન દિવાનિશં પ્રદહિતે શમ્ભોઽનુકમ્પાં કુરુ ॥ ૧૬॥

હે કાલાન્તક શાન્તિદાન્તિનિરતસ્વાન્તાન્તરઙ્ગસ્થિત
મત્તાનન્તજગત્સરાન્તરસુહૃત્સંસારતાન્તં હિ મામ્ ।
ભ્રાન્તં ભીતમશાન્તબુદ્ધિમનિશં કામાન્તરઙ્ગં સદા
માં રક્ષાશુ દયાનિધે હર ઉમાકાન્ત પ્રભો શઙ્કર ॥ ૧૭॥

હે શઙ્કર સ્મરહરાન્ધકકાલશત્રો
સંસારરોગ હરવૈદ્ય સુરોત્તમાદ્ય
પાહ્યદ્વય શ્રુતિશિરસ્સ્તુતપાદ ગદ્ય-
પદ્યસ્તુતિ પ્રકટિતપ્રમથાધિનાથ ॥ ૧૮॥

વિદ્યુત્સુચઞ્ચલલલનરદેહમેતઁ-
લ્લબ્ધ્વાપિ તે પદયુગં ન ભજામિ મુગ્ધઃ ।
હે વ્યાલમાલ ગરશોભિતકણ્ઠમૂલ
દિવ્યત્રિશૂલકર કાલગલાતિલીલ ॥ ૧૯॥

કોલાહલધ્વનિકરોત્તમભાલમૂલ-
જ્વાલાનલાયિતપુરત્રયતૂલ શમ્ભો ।
પાહીન્દુધામ સુલલામ જટોત્તમાઙ્ગ
માલાયિતાબ્જજકપાલ તલાતલસ્થ ॥ ૨૦॥

વિશ્વાધિક વિશ્વબન્ધરચિતામેય યમધ્વંસક
કાયાપાયમપાકુરુષ્વ ભગવન્ માયાન્ધકારં હર ।
મેયં તે પદપઙ્કજં પ્રતિભવેઽપ્યેવં મુહુઃસિધ્યતાં
હેયા મે વિષયા ભવન્તુ નિયતં હેયં ન તે પૂજનમ્ ॥ ૨૧॥

મીનધ્વજાદ્રિષુ પરં પરિખિન્નચિત્તં

હૃત્તાપયુક્તમથ વિત્તગણાર્જનેન ।
પિત્તોલ્બણેન સતતં ભ્રમદન્તરઙ્ગં
આશાશમાય કરુણાં કુરુ પાહિ દીનમ્ ॥ ૨૨॥

હે સ્વર્ણવર્ણસદૃશોત્તમકર્ણિકાર-
મન્દારકુન્દકરવીરસદમ્બુજાર્ચ્ય ।
બિલ્વોત્તમાઙ્ગ સુકદમ્બક ચમ્પકાદિ-
દૂર્વાર્ચ્ય શઙ્કર વિભો પરિપાહિ દીનમ્ ॥ ૨૩॥

હે વિશ્વનાથ મથિતાન્તકમન્મથાઙ્ગ
ગૌરીસનાથ મમ નાથ સુરપ્રમાથ ।
માં રક્ષ શઙ્કર અનાથજનપ્રમાથ
નાથાધુનાઽધ્વનિકૃતે વરમદ્રિનાથ ॥ ૨૪॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે શાઙ્કરૈઃ કૃતા શિવસ્તુતિઃ સમ્પૂર્ણા ॥

- ॥ શ્રીશિવરહસ્યમ્ । ભીમાખ્યઃ અષ્ટમાંશઃ । અધ્યાયઃ ૧૫ । ૯-૨૪॥

- .. shrIshivarahasyam . bhImAkhyaH aShTamAMshaH . adhyAyaH 15 . 9-24..

Notes:
Śāṅkarāḥ શાઙ્કરાઃ eulogize Śiva શિવ.

Proofread by Ruma Dewan

*Shankaraih Prokta Shiva Stuti*

pdf was typeset on July 5, 2024

Please send corrections to *sanskrit@cheerful.com*